# अथवार्ताः

## प्रधानमन्त्री - परीक्षा-परिष्कार-कार्यबलम्

प्रधानमन्त्री नरेन्द्रमोदी परीक्षापरिष्कारार्थम् उच्चस्तरीयकार्यबलस्य निर्माणस्य घोषणां कृतवान्। अस्य कार्यबलस्य अध्यक्षतां विख्यातः प्रौद्योगिकीविशेषज्ञः नन्दन-नीलेकणिः करिष्यति।

अस्मिन् कार्यबले आई.बी. इत्यस्य पूर्व निदेशकः तपन-डेका, पूर्व-इसरो-अध्यक्षः एस्. सोमनाथः, आई.आई.टी.-चेन्नई इत्यस्य पूर्व निदेशकः वी. कामकोटिः, पूर्वशिक्षासचिवा अनीता करवालः तथा आपूर्ति-शृङ्खला-प्रबन्धन-विशेषज्ञः अमितलालमीणा च सदस्याः भविष्यन्ति।

एकस्मिन् दृश्य-श्रव्य-सन्देशे प्रधानमन्त्री अवदत् यत् एतत् कार्यबलं परीक्षा-व्यवस्थायाः सुदृढीकरणे विशेषं ध्यानं दास्यति। तस्य अनुशंसानाम् आधारेण भावि-परीक्षाणां विश्वसनीयतां सुनिश्चेतुम् आवश्यकोपायाः यथाशीघ्रं क्रियन्ते।

तेन एतदपि उक्तं यत् परीक्षा-सम्बद्धानाम् अनियमिततानां निवारणाय कठोरप्रावधानयुक्तं नूतनविधेयकं प्रशासनम् अद्य संसदि प्रस्तौति।

**संसद् - विधेयकम्**

प्रशासनम् अद्य लोकसभायां सार्वजनिकपरीक्षा-अनुचितसाधन-निवारण-संशोधन-विधेयकम्, विंशतिः षड्विंशतिः इति प्रस्तुतं करिष्यति। एतस्य विधेयकस्य सार्वजनिकपरीक्षा-अनुचितसाधन-निवारण-अधिनियमम्, विंशतिः चतुर्विंशतिः इत्येतस्मिन् संशोधनम् अस्ति। केन्द्रीयमन्त्री डॉ. जितेन्द्र-सिंहः एतत् विधेयकं लोकसभायां प्रस्तोष्यति।

गतशुक्रवासरे केन्द्रीयमन्त्रिमण्डलेन प्रश्नपत्रस्य गोप्यताभङ्गे परीक्षासु च अनुचितसाधन-प्रयोगस्य प्रकरणेषु द्रुतन्यायालयानां स्थापनाय दोषिभ्यः कठोरतरदण्डविधानं च सुनिश्चेतुं प्रारूपविधेयकम् अनुमोदितम्।

**जोशी - शिक्षामन्त्रालयम्**

केन्द्रीयमन्त्री प्रह्लादजोशी शिक्षामन्त्रिणः कार्यभारम् अधिगृहीतवान्। धर्मेन्द्रप्रधानस्य त्यागपत्रानन्तरं गतशनिवासरे सः अस्मिन् पदे नियुक्तः। श्रीजोशी स्ववर्तमानमन्त्रालयैः सह शिक्षामन्त्रालयस्य दायित्वमपि निर्वहिष्यति।

**राजनाथः - कारगिल**

रक्षामन्त्री राजनाथसिंहः उक्तवान् यत् पाकिस्तानदेशेन सह कापि वार्ता न भविष्यति। भारतस्य सम्पूर्णं ध्यानं केवलं पाकिस्तानाधिकृतस्य जम्मू-कश्मीरप्रदेशस्य भागं  पुनः प्राप्तौ एव भविष्यति।

रक्षामन्त्री ह्यः लद्दाखस्य द्रास-नगरे सप्तविंशतितमं कारगिल-विजय-दिवस-समारोहं सम्बोधयन् एतद् वक्तव्यं प्रदत्तवान्।

**दिल्ली - महिला-अल्पसंख्यक-आयोगौ**

दिल्ली-प्रशासनेन दिल्ली-महिलायोगस्य दिल्ली-अल्पसंख्यकायोगस्य च निर्माणं कृतम्। लतागुप्ता दिल्ली-महिलायोगस्य अध्यक्षा नियुक्ता। तया सह श्यामबाला, मालतीवर्मा, लतासोढी, सनरिका-शर्मा-झा तथा रेनूभल्ला सदस्यत्वेन नियुक्ताः। निर्मल-जैन इत्येषः दिल्ली-अल्पसंख्यकायोगस्य अध्यक्षः नियुक्तः। तेन सह कुलदीपसिंहः मोहम्मद-हारून् च सदस्यत्वेन नियुक्तौ। मुख्यमन्त्री रेखागुप्ता अवदत् यत् एतेषां पदक्षेपाणाम् उद्देश्यं महिलानां अधिकाराणां संरक्षणम्, तासां सशक्तीकरणम्, अल्पसंख्यकसमुदायानां कल्याणं सुनिश्चेतुं तथा तेषां संवैधानिकाधिकाराणां संरक्षणं च अस्ति।

**अमेरिका - ईरान**

अमेरिका-ईरान-देशौ द्वितीयदिने आक्रमणानि स्थगितवन्तौ, येन प्रायः सप्ताहद्वयानन्तरं वर्धमानस्य सैन्याक्रमणानन्तरं अन्तरिम-युद्धविराम-विषये पुनः वार्तालापस्य सम्भावना समुत्पन्ना। संयुक्तराष्ट्रसङ्घस्य अमेरिका-देशस्य राजदूतः माईक् वाल्ट्ज़् इत्येषः ह्यः अवदत् यत्, राष्ट्रपतिः ट्रम्पः कूटनीतेः अवकाशं प्रददाति, यत् ओमानः, ईरानः, अन्ये च वार्ताकाराः गतसप्ताहेषु सर्वस्तरीय-वार्तासु निमग्नाः सन्ति। वाल्ट्ज़् इत्यनेन अमेरिका-देशे ईरानस्य आक्रमणेभ्यः रक्षणाय प्रयुक्तानां अवरोधक-प्रक्षेपास्त्राणां न्यूनतायाः सूचनाः निराकृताः। ईरान-देशस्य सेनायाः प्रवक्ता

ह्यः अवदत् यत् प्रतिक्रियारूपेण तेहरान इत्यनेन अस्मिन् प्रदेशे प्रतिकार-आक्रमणानि स्थगितानि।

**राष्ट्रमण्डल-क्रीडा**

ग्लास्गो-नगरे प्रचलितासु राष्ट्रमण्डल-क्रीडासु महिलानां अष्टचत्वारिंशत्-किलोग्राम्-स्पर्धायां भारतीय-भारोत्तोलिका मीराबाई चानु इत्येषा स्वर्णपदकं विजितवती। एकत्रिंशत्-वर्षीया भारोत्तोलिका उत्कृष्ट-प्रदर्शनेन ऐतिह्यं विरचितवती। उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः, प्रधानमन्त्री नरेन्द्रमोदी, गृहमन्त्री अमितशाहः च मीराबाई चानू इत्यस्याः स्वर्णपदकं विजयाय अभिनन्दनं कृतवन्तः।

**॥ इति वार्ताः॥**